दिनाङ्क :- 20.09.2024

सायम् - 06:20

# संस्कृत-वार्ता:

मुख्यवार्ता:

- प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् विश्वकर्मायोजना भारतस्य विकासाय सहस्रवर्षपुरातन-कौशलानाम् उपयोगाय दिग्निर्देशः अस्ति।
- कृषकाणां आयवर्धनार्थं कृषिआधारित-उद्योगस्य प्रचारार्थं राष्ट्रपतिः द्रौपदी मुर्मु: बलं प्रदत्तवती।
- केन्द्रीय गृहमंत्री अमित शाह: अद्य झारखण्डे परिवर्तन यात्रायाः शुभारम्भं कृतवान्। वरिष्ठनागरिकाणां कृते नि:शुल्कोपचारम् अपि प्रतिज्ञापितवान्।
- बाङ्गलादेशस्य विरुद्धं-निकष स्पर्धायां द्वितीयदिनस्य अन्ते भारतं द्वितीये द्वन्द्वे त्रयाणां स्तोभानां हानिः पुरस्सरं एकाशीति धावनाङ्कान् समर्जित्य अष्टोत्तर-त्रिशतं धावनांकै: अग्रे चलति।

प्रधानमन्त्री-वर्धा

प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् विश्वकर्मायोजना भारतस्य विकासाय सहस्रवर्षपुरातन-कौशलानाम् उपयोगाय दिग्निर्देशः अस्ति। वर्धायाः स्वावलम्बी-क्रीडाङ्गणे पीएम विश्वकर्मायोजनायाः वार्षिकोत्सवे एकं कार्यक्रमं सम्बोधयन् श्रीमोदी पीएम विश्वकर्मायोजनायाः लाभं गृहीत्वा कार्मिकेभ्यः उद्यमिनः व्यापारिणः च भवितुम् आह्वानं कृतवान्। प्रधानमन्त्रिणा उक्तं यत् पारम्परिकव्यापारस्य उत्पादकता वर्धयितुं षड् दशमलव पञ्च लक्षाधिकेभ्यः लाभार्थिभ्यः आधुनिकयन्त्राणि, उपकरणपुस्तिकाः च प्रदत्ताः। सः ऋणयोजनायाः लाभस्य विषये अपि अवदत् यया त्रीणि लक्षरूप्यकाणां ऋणं प्राप्यते। विगते वर्षे चतुर्दशशतं-कोटिरूप्यकाणां ऋणानि लाभार्थिभ्यः वितरितानि। प्रधानमन्त्रिणा महाराष्ट्रसर्वकारस्य योजनाद्वयं प्रारब्धम् येषु यूनां निःशुल्ककौशलविकासप्रशिक्षणार्थं 'आचार्य चाणक्यकौशलविकासकेन्द्रम्" तथा च महिलानेतृत्वेन स्टार्टअप आत्मनिर्भरतां प्राप्तुं 'पुन्याश्लोक अहिल्यादेवी होल्करमहिला-स्टार्टअप-योजना' इति कार्यक्रमे, प्रधानमन्त्रिणा पीएम मित्र टेक्सटाइल पार्क इत्यस्य आधारः अपि स्थापितः यत् पश्चिमविदर्भस्य अमरावतीमण्डले स्थापितं भविष्यति तथा च एषा परियोजना एक लक्षं यावत् नूतनानि वृत्यावसराणि सृजति तथा च दश सहस्रकोटितोप्यधिकं निवेशं आकर्षयिष्यति।

राष्ट्रपति-आईसीएआर

राष्ट्रपतिः द्रौपदी मुर्मू अद्य रांचीनगरस्य नामकुमनगरे ICAR- इति राष्ट्रिय द्वितीयक कृषि संस्थानस्य 'निसा' इत्यस्य शतवार्षिकसमारोहं सम्बोधितवती। अस्मिन् अवसरे प्रवदन्ती राष्ट्रपतिः मुर्मूः अवदत् यत् देशे लैक् इति उत्पादनं प्राप्तुं ICAR- NISA इत्यनयोः उकृष्टम् योगदानं अस्ति। अनया संस्थया न केवलं कृषिसम्बद्धं अनुसन्धानविकासकार्यं कुशलतापूर्वकं कृतम् अपितु एतादृशं शोधं कार्यं सर्वसुलभं अपि कृतम् अस्ति

। राष्ट्रपतिः अवदत् यत्, झारखण्डे देशस्य पञ्चपञ्चाशत् प्रतिशतं लक्षं यावत् उत्पादनं भवति । कृषकाणां आयवर्धनार्थं कृषिआधारित-उद्योगस्य प्रचारार्थं राष्ट्रपतिः बलं दत्तवती । राष्ट्रपतिः मुर्मूः वैज्ञानिकान प्रोक्तवती यत् कृषकान् द्वितीयक कृषेः विषये जागरूकं कुर्वन्तु इति । सा प्रोक्तवती यत् अस्मिन् विषये ICAR प्रभावी रूपेण कार्यं कर्तुं शक्नोति । राष्ट्रपतिः अवदत् यत् कृषकाणां कृते प्रसंस्करण-एकांशस्य प्रशिक्षणानन्तरं कृषकाणां आयम् वर्धिष्यति । राष्ट्रपतिः मुर्मूः अवदत् यत् कृषकैः अपशिष्टसामग्रीणां उपयोगेन तेभ्यः आर्थिकसुदृढीकरणे अपि सहाय्यं भविष्यति ।

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।

केन्द्रीयगृहमन्त्री अमितशाहः

केन्द्रीयगृहमन्त्री अमितशाहः प्रतिपादितवान् यत् सर्वकारेण निर्णयः स्वीकृतः अस्ति यत् षड्विंशत्यधिक द्विसहस्रतम वर्षस्य मार्च-मासात् पूर्वं नक्सलवादेन नक्सलवादस्य विचारेण च देशः मुक्तः भविष्यति। श्रीशाहः अद्य नवदिल्ल्यां स्वीय निवासस्थाने छत्तीसगढ़े नक्सलहिंसायाः प्रायः पञ्च पञ्चाशत् पीडितैः सह संवादं कुर्वन् आसीत् । सः अवदत् यत् बस्तरस्य चत्वारि-मण्डलानि विहाय सम्पूर्णे देशे नक्सलवाद-समापने केन्द्रं सफलं जातम्। श्रीशाह: नक्सले संलग्नानां जनानाम् अपि आह्वानं कृतवान् यत् ते हिंसां त्यक्त्वा शस्त्राणि स्थापयन्तु, आत्मसमर्पणं च कुर्वन्तु । सः अवदत् यत् यदि ते हिंसां विहाय तस्य आह्वानं न श्रृण्वन्ति तर्हि तेषां विरुद्धं सर्वकारेन शीघ्रमेव अभियानं आरभते ।

प्रल्हदजोशी-मोदकम्

केन्द्रीयखाद्यमन्त्री प्रल्हदजोशी उक्तवान् यत् आन्ध्रप्रदेशस्य मुख्यमन्त्रीणा उत्थापितस्य तिरुपतिमन्दिरस्य मोदकेषु पशुमेदः अस्ति इति विषयः गम्भीरः विषयो वर्तते । अद्य नवदिल्ल्याम् एकस्मिन् आयोजने वार्ताहरैः सह संवादं कुर्वन् श्रीजोशी अवदत् यत्, अस्मिन् विषये विस्तृत परीक्षणं भवितुमर्हति, दोषिणः दण्डनीयाः च। राष्ट्रीयदुग्धविकासमण्डलस्य प्रयोगशालायाः पशुधनविश्लेषणशिक्षणकेन्द्रेण तिरुपतिनगरस्य श्रीवेङ्कटेश्वरस्वामीमन्दिरस्य प्रसादरूपेण अर्पिते मोदकनिर्माणे प्रयुक्ते घृते पशुमेदस्य उपस्थितेः पुष्टिः कृता अस्ति ।

पीयूषगोयलः - लाओस्

केन्द्रीयवाणिज्य-उद्योगमन्त्री, पीयूषगोयलः अद्य लाओस्-देशस्य द्विदिवसीय यात्रायां भविष्यति, येन आसियान-भारत-आर्थिकमन्त्रिणां एकविंशति तमे सत्रे तथा च द्वादश तमे पूर्व एशिया-शिखर-आर्थिकमन्त्रिणां-सभायां भागं गृह्णीयात् । यात्रावधौ मन्त्री द्वयस्य संस्थागत-उपवेशनस्य सहभागिदेशै: स्वसमकक्षैः सह अनेकानि द्विपक्षीयोपवेशनानि अपि करिष्यति । सः आतिथ्यदेशस्य लाओ पीडीआर-मन्त्रिणा सह कोरिया-मलेशिया-स्विट्ज़रलैण्ड्-म्यान्मार-देशानाम् आगन्तुकैः मन्त्रिभिः सह अपि मेलिष्यति ।

अमित शाह-परिवर्तन यात्रा

केन्द्रीय गृहमंत्री अमित शाह: अद्य झारखण्डराज्यस्य साहेबगंजमण्डलस्य भोगनाडी स्थलात् झारखण्ड-भाजपादलस्य संथालपरगना संभागाय परिवर्तन यात्रायाः शुभारम्भं कृतवान्। पुलिसलाइन इत्यस्मिन् उद्याने जनसभां सम्बोधयन् श्रीशाहः अवदत् यत् परिवर्तनयात्रायाः अनन्तरं राज्ये निर्वाचनप्रचारः आरब्धः अस्ति। श्री शाह: प्रतिज्ञापितवान् यत् यदि राज्ये भाजपेतिदलस्य सर्वकारः भवति तर्हि सप्तपञ्चाशत् वर्षतोप्यधिक जनानां कृते दशलक्षरूप्यकाणि यावत् निःशुल्कं उपचारं प्रदास्यते। सः आक्षिप्तवान् यत् बाङ्गलादेशस्य अवैध रित्या आगतै: राज्यस्य संथालक्षेत्रस्य जनसांख्यिकीयं परिवर्तनं कृतम् अस्ति।

क्रिकेट्

क्रिकेट्-क्रीडायां एम.ए.चिदम्बरम-क्रीडाङ्गणे बाङ्गलादेशस्य विरुद्धं-निकष स्पर्धायां द्वितीयदिनस्य अन्ते भारतं द्वितीये द्वन्द्वे त्रयाणां स्तोभानां हानिः पुरस्सरं एकाशीति धावनाङ्कान् समर्जितवान्।

॥ इति वार्ताः॥